**अभुज्** त्रि० न भुङ्क्ते भुज–क्विप् न०त०। अभक्षके। "नभ आष्टयोः किमभुग्वदामि" ऋ०१०,९५,११।

**अभूत** त्रि० न भूतः। भूतशब्दार्थभिन्ने। "अभूतमासज्य विरुद्धमीहितम्" माघः। २ मिथ्याभूते ३ अविद्यमाने च

**अभूततद्भाव** पु० अभूतस्य प्रकृतिरूपेणानाविर्भूतस्य तेन रूपेण भावः। यः कश्चित् पदार्थः येन रूपेण प्रागभूतस्तेन रूपेण तस्याविर्भावे। यथा मृत्तिका घटीभवति। "कृभ्वस्तियोगे सम्पद्ये कर्त्तरि च" पा० "अभूततद्भावे इति वक्तव्यम्" वा०। [त्वाभिमाने।

**अभूताभिनिवेश** पु० अभूतेऽसत्येऽभिनिवेशः। असत्ये सत्य-

**अभूति** स्त्री अभावे न०त०। १ भवनाभावे "तस्य ह न देवाश्च नाभूत्या ईशते" शत० ब्रा०। "अभूत्यै अभवनाय" भा० २ सम्पत्त्यभावे" "ध्वजाश्चापि व्यशीर्य्यन्त भरतानामभूतये" भा०श०प०। न०ब०। भूतिशून्ये त्रि०।

**अभूमन्** पु० विरोधे न०त०। १ भूरिभिन्ने स्वल्पे।

**अभूमि** स्त्री न०त०। १ अनाश्रमे अविषये "अभूद्भूमिः प्रतिपक्षजन्मनां भियामिति" माघः "अभूमिरियमपनयस्य" शकु० "नाभूद्भूमिः स्मरशायकानाम्" नैष०। "सखलु मनोरथानामप्यभूमिर्विसर्जनावसरसत्कारः" इति शकु०। अप्राशस्त्ये न०त०। अप्रशस्तभूमौ। न०ब०। भूमिशून्ये त्रि०।

**अभूमिज** त्रि० न०त०। १ भूमिजभिन्ने आकाशजे जलादौ २ अप्रशस्तभूमौ उत्पन्ने धान्यादौ च। "अभूमिजं नवञ्चापि न धान्यं गुणवत् स्मृतमिति" सुश्रुतः।

**अभूयिष्ठ** त्रि० विरोधे न०त०। भूरिभिन्ने अल्पे।

**अभूषित** त्रि० विरोधे न०त०। भूषितभिन्ने अपरिष्कृते

**अभृत** त्रि० न भृतः। १ अप्राप्तवेतने। गोस्वाम्यनुमते भृत्यः सा स्यात् पालेऽभृते भृतिः" मनुः २ अपुष्टे च।

**अभृश** त्रि० न०त०। १ भृशभिन्ने मन्दे अल्पे।

**अभेद** पु० अभावे न०त०। भेदाभावे ऐक्ये "गतयोरभेदमिति सैन्ययोस्तयोः" माघः "अभेदः शिवरामयोः" पुरा० "रलयोर्डलयोश्चैव जययोर्बवयोरपि। शसयोर्णनयोश्चान्ते सविसर्गाविसर्गयोः। सविन्दुकाविन्दुकयोः स्यादभेदेन कल्पनम्" आलङ्कारिकाः "गुणगुणिनोः क्रियाक्रियावतोश्चाभेद" इति सांख्यादयः। अभेदस्य भेदाभाव इति बहवः। तादात्म्यमिति तु साङ्ख्यादयः। तादात्म्यञ्च तत्सत्त्वनियतसत्ताकत्वं तेन गुणगुणिनोः क्रियाक्रियावतोरपि तादात्म्यं गुणक्रिययोर्द्रव्यनियतसत्ताकत्वात् अतएव वेदान्तपरिभाषायाम् सत्यैक्ये मिथोभेदस्तादात्म्यमित्युक्तं द्रव्यगुणयोर्मिथोभेदसत्त्वेऽपि तत्सत्त्वनियतसत्ताकत्वात् तथात्वम्।

**अभेद्य** त्रि० भेत्तुं शक्यते भिद–शक्यार्थे ण्यत् न०त०। १ भेत्तुमशक्ये "अभेद्यकवचं दधे" भा०द्रो०प०। २ हीरके न० तस्य केनापि धातुना भेत्तुमशक्यत्वात् तथात्वम्।

**अभोक्तव्य** त्रि० न भोक्तुमर्हम् स्मृत्यादिनिषिद्धत्वात्। अभक्ष्ये। तच्चाभक्ष्यशब्दे २७४ पृष्ठे दर्शितम्।

**अभोक्तृ** त्रि० न भोक्ता स्त्रियां ङीप्। भोक्तृभिन्ने। [त्रि०

**अभोग** पु० अभावे न०त०। १ भोगाभावे न०ब०। २ भोगशून्ये

**अभोजन** न० अभावे न०त०। भोजनाभावे उपवासे "स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम्" "यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम्" इति च मनुः। भोजनाभावश्च भोजनविषयकनिवृत्तिरिति मीमांसकाः भोजनात्यन्ताभाव इति नैयायिकाः अत्यन्ताभवस्य नैमिकजन्यत्वाङ्गीकाराच्च कृतिसाध्यत्वमिति विवेकः। भोजनाभावस्य भोजने क्वचिद्रागाभावेन रोगेण वा, क्वचिच्च शास्त्रादितो भोजने बलवदनिष्टसाधनत्वज्ञानेन विरोधात् इष्टसाधनताज्ञानानुदयेन, यथा न कलञ्जं भक्षयेदित्यादौ। क्वचिच्च व्रतरूपे भोजनाभावे इष्टसाधनताज्ञानेन। स च भोजननिवृत्तिस्तदन्याभावो वेत्युक्तम्। विस्तरस्तु निषेधनिषेधविधिशब्दयोर्दृश्यः। "अजीर्णे भोजनं येषां जीर्णे येषामभोजनम् रात्रावभोजनं येषां तेषां नश्यन्ति धातव" इति वैद्य०। न०ब०। २ भोजनशून्ये त्रि०।

**अभोज्य** त्रि० न भोक्तुं शक्यं निषिद्धत्वात्। अभक्ष्ये तत्स्वामिनि उपचारात् "अभोज्यानान्तु भुक्त्वान्नमिति" मनुः अभक्ष्यशब्दे २७४ पृष्ठे विवरणम्।

**अभोज्यान्न** त्रि० न भोज्यमन्नं यस्य स्मृतिनिषिद्धत्वात्। अभक्ष्यान्नस्वामिनि ते च अभक्ष्यशब्दे २७४ पृष्ठे उक्ताः। "य एतेऽन्ये त्वभोज्यान्नाः क्रमशः परिकीर्त्तिताः" मनुः।

**अभौम** न० भूमौ भवम् न०त०। भौमभिन्ने नाभसजलादौ विवरणं जलशब्दे "अभौममम्भोविसृजन्ति मेघाः" इति पुरा०

**अभ्यक्त** त्रि० अभि+अन्ज–क्त। १ कृततैलाद्यभ्यङ्गे २ अभितोलिप्ते च।

**अभ्यग्र** त्रि० अभिमुखमग्रं यस्य। आसन्ने निकटे।

**अभ्यङ्ग** पु० अभि+अन्ज–घञ् कुत्वम्। तैलादिमर्द्दने। "मूर्ध्नि दत्तं यदा तैलं भवेत् सर्वाङ्गसङ्गतम्। स्रोतोभिस्तर्पयेत् बाह्ये अभ्यङ्गः स उदाहृतः" "तैलमल्पं यदाङ्गेषु न च स्याद्वाङ्गतर्पणम्। संसार्ष्टि बहुशोऽभ्यङ्गोमस्तकादौ प्रकीर्त्तितः" इति च वैद्यकोक्ते २ विशेषाभ्यङ्गे च। "तैलाभ्य-